## अथ शब्दानुशासनम्[1] । (म.भा. १. १)

केषां शब्दानाम् ? लौकिकानां वैदिकानां च (म. भा. १.१) । कथमनुशासनम् ? प्रकृत्यादिविभागकल्पनया[2] सामान्यविशेषवता लक्षणेन[3] (म. भा. १.६) । अथ किमर्थो वर्णानामुपदेशः ? प्रत्याहारार्थः[4] । प्रत्याहारो लाघवेन शास्त्रप्रवृत्त्यर्थः (म. भा. १.१३) ॥

## [5]अ इ उ ण् । (मा.सू. १)

अ इ उ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवत्येकेन 'उरण् रपरः' (१.१.५१/७०) इत्यकारेण । ह्रस्वमवर्णं प्रयोगे संवृतम् । दीर्घप्लुतयोस्तु विवृतत्वम् । तेषां सावर्ण्य-[6]प्रसिद्ध्यर्थमकार इह शास्त्रे विवृतः [7]प्रतिज्ञायते । तस्य प्रयोगार्थम् 'अ अ' (८.४.६८/११) इति शास्त्रान्ते प्रत्यापत्तिः करिष्यते[8] (म. भा. १.१५) ॥

## ऋ ऌ क् । (मा.सू. २)

ऋ ऌ [9]इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते ककारमितं करोति प्रत्याहारार्थम् । तस्य[10] ग्रहणं भवति[11] त्रिभिः । 'अकः सवर्णे दीर्घः' ( ६.१.१०१/८५) इत्यकारेण । '[12]इको गुणवृद्धी' (१.१.३/३४) इतीकारेण । 'उगितश्च' (४.१.६/४५५) इत्युकारेण । अकारादयो वर्णाः [13]प्रचुरप्रयोगविषयास्तेषां [14]सुज्ञानमुपदेशे प्रयोजनम् । ऌकारस्तु क्लृपिस्थ एव प्रयुज्यते । क्लृपेश्च '[15]पूर्वत्रासिद्धम्' (८.२.१/१२) इति लत्वमसिद्धम् । [16]तस्यासिद्धत्वाद् ऋकार एव[17] अच्कार्याणि [18]भविष्यन्ति इति किमर्थम् ऌकार उपदिश्यते ? लत्वविधानाद् यानि पराण्यच्कार्याणि तानि ऌकारे यथा स्युरिति । कानि पुनस्तानि ? [19]प्लुतः स्वरितो द्विर्वचनम् । [20]क्लृ३प्तशिखः, [21]प्रक्लृप्तः, प्रक्लृप्तवान् इति । यच्चाशक्तिजमसाधु-शब्दरूपं, तदनुकरणस्यापि साधुत्वमिष्यते । तत्स्थस्यापि ऌकारस्याच्कार्यप्रतिपत्त्यर्थम् ऌकारोपदेशः[22] क्रियते । ऋतकः इति प्रयोक्तव्ये शक्तिवैकल्यात् [23]कुमारी ऌतकः इति प्रयुङ्क्ते,[24] तदन्योऽनुकरोति कुमार्यॢतकः इत्याह इति[25] ॥

## ए ओ ङ् । (मा.सू. ३)

ए ओ इत्येतौ वर्णावुपदिश्य अन्ते ङकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवत्येकेन । '[26]एङि पररूपम्' (६. १. ९४/७८) इत्येकारेण ॥

---

1. इयं पङ्क्तिः केषुचन मुद्रितपुस्तकेषु नास्ति. 2. प्रकृतिप्रत्ययादिपरिकल्पनया ङ. 3. च ङ. 4. प्रत्याहार-ग्रहणार्थः ङ. 5. ॐ ह. 6. प्रसिद्धार्थप्रकारः शास्त्रे ब. ग. 7. प्रतिज्ञायते नास्ति ग. 8. स्वरूपादिप्रच्युतस्य पुनस्तत्प्राप्तिः प्रत्यापत्तिः इत्यधिकम् ङ. 9. एतौ ङ. 10. च ङ. 11. भवति नास्ति ङ. 12. इको यणचि ग. ह. 13. प्रचुरविषयाः ब.क.ङ.फ. 14. सज्ज्ञानम् फ. 15. पूर्वत्रासिद्धम् इति नास्ति फ. 16. तत्र ब. क. ङ. इ. 17. एकाच् ङ. फ. 18. भविष्यन्ति नास्ति फ. 19. च प्लुतः ङ, प्लुतस्वरितद्विर्वचनानि ग. ह. 20. क्लृप्तशिख—अनुकरोति एष भागः नास्ति फ. 21. क्लृप्तः क.ङ.ह. 22. उपदेशः इ.ङ. 23. कुमार्यॢतक ग.फ.ह.इ. 24. तामन्यो ब. क.ग.ङ.ह.इ. 25. इति नास्ति ङ. 26. एङः पदान्तादति क.